"वर्जयेत् मधुमांसञ्च भौमानि कवकानि च ।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च ॥")

श्लेष्मान्तकः, पुं, (श्लेष्माणं श्लेष्मसेवनजनितकफेन अन्तयति नाशयतीति । अन्त + णिच + ण्वुल् ।) वृक्षविशेषः । बहुयार इति वङ्गभाषा । लसोड़ा इति हिन्दी भाषा । तत्पर्य्यायः । बहुवारः २ पिच्छिलः ३ द्विजकुत्सितः ४ शेलुः ५ शीतफलः ६ शीतः ७ शाकटः ८ कर्च्चुदारकः ९ भूतद्रुमः १० गन्धपुष्पः ११ । अस्य गुणाः । कटुत्वम् । हिमत्वम् मधुरत्वम् । कषायत्वम् । स्वादुत्वम् । पाचनत्वम् कृमिशूलहरत्वम् । पामास्रदोषमलरोधवहुव्रणार्त्तिविस्फोटशान्तिकरत्वम् । कफकारकत्वञ्च । इति राजनिर्घण्टः ॥ अस्यामफलगुणाः । विष्टम्भित्वम् । रूक्षत्वम् । पित्तकफास्रनाशित्वञ्च । तत्पक्वफलगुणाः । मधुरत्वम् । स्निग्धत्वम् । श्लेष्मत्वम् । शीतलत्वम् । गुरुत्वञ्च । इति भावप्रकाशः ॥

श्लैष्मिकं, त्रि, (श्लेष्माणः शमनं कोपनं वा । श्लेष्मन् + "वातपित्तश्लेष्मभ्यः शमनकोपनयोः ।" ५ । १ । ३८ । इत्यस्य वार्त्तिकोक्त्या ठञ् । कफशमनम् । कफकोपनम् । इति व्याकरणम् ॥) श्लेष्मोद्भवम् । श्लेष्मसम्बन्धीयम् । इति श्लेष्मशब्दात् ष्णिकप्रत्ययेन निष्पन्नम् ॥ (यथा, सुश्रुते । १ । १ ।
"चिकित्साप्रविभागीये वाताभिष्यन्दवारणः ।
पैत्तिकस्य श्लैष्मिकस्य रौधिरस्य तथैव च ॥")

श्लोक, ऋ ङ संघाते । वर्ण्णने । सर्ज्जने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक०-च-सेट् ।) सघात इह छन्दोविशिष्टवाक्यरचनम् । ऋ, अशुश्लोकत् । ङ, श्लोकते कविः । इति दुर्गादासः ॥

श्लोकः, पुं, (श्लोक्यते इति । श्लोकसंघाते + घञ् ।) पद्यम् । यशः । इत्यमरः ॥ * ॥ (वाक् । इति निघण्टुः । १ । ११ ॥ "शु श्रवणे 'इण् भीकापाशल्यतिमर्चिभ्यः कन्' इति कन्प्रत्ययो बाहुलकाद्भवति गुणः कपिलकादित्वाल्लत्वम् । श्रूयते इति श्लोकः । यद्वा श्लोक संघाते 'पुंसि संज्ञायां घः ।' श्लोक्यते पद्यते रूपेण संङ्गन्यते कविभिः श्लोकः ।" इति तट्टीका ॥) श्लोकनाम कारणम् । यथा,—
"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥
तस्येत्थं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः ।
शोकार्त्तेनास्य शकुनेः किमिदं व्याहृतं मया ॥
चिन्तयन् स महाप्राज्ञश्चकार मतिमान् मतिम् ।
शिष्यञ्चैवाब्रवीद्वाक्यमिदं स मुनिपुङ्गवः ॥
पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥"
इति रामायणे वाल्मीकीये बालकाण्डे २सर्गः ॥

श्लोण, ऋ सङ्घाते । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अशुश्लोणत् । संहातो राशीकरणम् । इति दुर्गादासः ॥

श्वः, [स्] व्य, अनागताहः । इत्यमरः ॥ कालि इति भाषा ॥ (यथा, रामायणे । २ । ६४ । ३६ ।
"श्वो मया सह गन्तासि जनन्या च समेधितः ॥")

श्वःश्रेयसं, क्ली, (श्वः आगामिकाले श्रेयो यत्र । "श्वसो वसीयःश्रेयसः ।" ५ । ४ । ८० । इति अच् ।) कल्याणम् । इत्यमरः ॥ (यथा, भट्टिः । ४ । ३८ ।
"श्वःश्रेयसमवाप्नासि भ्रातृभ्यां प्रत्यभाणि सा ॥")
परमात्मा । धर्म्मः । इति मेदिनी ॥ कल्याणयुक्ते, त्रि ॥

श्वक, इ ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) वकारयुक्ताद्यः । इ, शङ्क्यते । ङ श्वङ्कते । सर्पो गतिः । इति दुर्गादासः ॥

श्वगणः, पुं, (शुनां गणः ।) कुक्कुरसमूहः । यथा । द्वारादेयवयोरिमुमौ स्यातां णित्तश्चिते परे । श्वापदन्त्वङ्गीस्तु वा । न तु श्वगणप्रभृतीनाम् । इति मुग्धबोधव्याकरणटीकायां दुर्गादासः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ८ । १४ ।
"श्वगणा नात्र दृश्यन्ते पिशाचा मांसभोजनाः ॥")

श्वच, ङ / श्वच, इ ङ } गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) द्वौ वकारयुक्तादी । पुनःपाठादाद्यो नेदनुबन्धः । ङितौ तु द्वौ । एक एवेत्याठवलाद्वाध्य इति नियमात् । ङ, श्वचते । इ, श्वञ्चते । ङ, श्वञ्चते । इति दुर्गादासः ॥

श्वट, क / श्वठ, इ क } गतौ । असंस्कृते । संस्कृते । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) द्वौ वकारयुक्तौ पुनःपाठादाद्यो नेदनुबन्धः । त्रयः अर्थाः । क, श्वाठयति । इ क, श्वण्ठयति जनः । गच्छति किमपि संस्करोति वा इत्यर्थः । संस्कारगत्यारिति केचित् । इति दुर्गादासः ॥

श्वठ, त् क दुर्व्वाचि । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट् ।) वकारयुक्तः । श्वठयति नीचः । कुत्सितं वदतीत्यर्थः । रमानाथस्तु सम्यग्भाषणे इति मत्वा श्वठयति सम्यग्वदतीत्यर्थं इत्याह । सम्यग्भाग इत्यप्येके इति दुर्गादासः ॥

श्वदंष्ट्रकः, पुं, (शुनो दंष्ट्रेव कण्टकोऽस्य ।) गोक्षुरः । इति राजनिर्घण्टः ॥

श्वदंष्ट्रा, स्त्री, (शुनो दंष्ट्रेव कण्टकाहतत्वात् ।) गोक्षुरकः । इत्यमरः ॥ (यथा, सुश्रुते । १ । ३८ ।
"पिप्पल्यादीनां श्वदंष्ट्रावसुकाश्वः कुष्माण्डादीनां दार्व्वीकरामवः ॥")

श्वधूर्त्तः, पुं, (शुनि धूर्त्तस्तद्वञ्चकत्वात् ।) शृगालः । इति शब्दरत्नावली ॥

श्वनिशं, क्ली, / श्वनिशा, स्त्री, } (शुना निशा । "सुराश्वेनाच्छायाशालानिशा स्त्रियाञ्च ।" इति लिङ्गानुशासनसूत्रेण विभाषया क्लीवत्वम् ।) शुनां निशा । इत्यमरभरतौ ॥ यस्याः कुक्कुरनिशा । यथा,—
"यस्यां मत्ता निशि श्वानः श्वनिशं श्वनिशा च सा ॥"
इति जटाधरः ॥

श्वपक् [च्] पुं, (श्वानं पचतीति । पच + क्विप् ।) चण्डालः । यथा । निषादः । श्वपचः श्वपक् । इति भरतधृतबोपालितः ॥ (यथा, मनुः । ३ । ९२ ।
"शुनाञ्च पतितानाञ्च श्वपचां पापरोगिणाम् ।
वायसानां कृमीणाञ्च शनकैर्न्निर्व्वपेत् भुवि ॥")

श्वपचः, पुं, (श्वानं पचतीति । पच + अच् ।) चण्डालः । इत्यमरः ॥ तस्य सञ्ज्ञा अन्त्यावसायी । तस्य धर्म्मो यथा,—
"चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः ।
अपपात्राश्च कर्त्तव्या धनं येषां श्वगर्द्दभम् ॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम् ।
कार्ष्णायसं मलङ्कारः परिव्रज्या च नित्यशः ॥
न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन् ।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥
अन्नं येषां पराधीनं देयं स्याद्भिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः ।
अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः ॥
बध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया ।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ॥ * ।
चाण्डालः श्वपचः चत्ता सूतो वैदेहकस्तथा ।
मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः ॥"
तस्यान्नभक्षणे प्रायश्चित्तं यथा,—
"अन्त्यावसायिनामन्नमश्नीयादयस्तु कामतः ।
स तु चान्द्रायणं कुर्य्यात् तप्तकृच्छ्रमथापि वा ॥"
इति प्रायश्चित्ततत्त्वधृताङ्गिरोवचनम् ॥

श्वपाकः, पुं, (शुनां पाकः कार्य्यत्वेन यस्य ।) चण्डालः । इत्यमरः ॥ तस्योत्पत्तिर्यथा,—
"क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्त्यते ॥"
इति मानवे १० अध्यायः ॥ * ॥
रजस्वलायास्तस्य स्पर्शने प्रायश्चित्तं यथा,—
"चाण्डालेन श्वपाकेन संस्पृष्टा चेत् रजस्वला ।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत् ॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति ।
तां निशान्तु व्यतिक्रम्य स्नानात्तु भक्तं कारयेत् ॥"
इति वचनान्तरदर्शनात् एतत् कामतः । अकामाने बृहस्पतिः ।
"पतितान्त्यश्वपाकैस्तु संस्पृष्टा स्त्री रजस्वला ।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत् ॥
प्रथमेऽह्नि त्रिरात्रन्तु द्वितीये द्व्यहमाचरेत् ।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत् ॥"
चतुर्थेऽह्नीति शुद्धिस्नानात् पूर्व्वम् । इति प्रायश्चित्ततत्त्वम् ॥

श्वफलः, पुं, (श्वप्रियं फलमस्य ।) बीजपुरः । इति रत्नमाला ॥

श्वफल्कः, पुं, हस्तिपुत्त्रः । स च अक्रूरपिता । यथा । धर्म्मात्मासान्वयेऽन्या तृष्णः । तस्मात् श्वफल्कः । तत्प्रभावः कथितएव । श्वफल्कस्यापि